
Swamy Nammazhwar




यस्य सारस्वतं स्रोतो वकुलामोदवासितम्।
श्रुतीनां विश्रमायालं शठारिं तमुपास्महे॥

Srimannathamuni




नाथेन मुनिना तेन भवेयं नाथवानहम्।
यस्य नैगमिकं तत्त्वं हस्तामलकतां गतम्॥

Srimadyamunamuni



विगाहे यामुनं तीर्थं साधुबृन्दावने स्थितम्।
निरस्तजिह्मगस्पर्शे यत्र कृष्णः कृतादरः॥

Swamy Bhagavad Bhashyakara



यो नित्यं अच्युतपदाम्बुजयुग्मरुक्मौ व्यामोहतस्तदितराणि तृणाय मेने

अस्मद्गुरोर्भगवतोस्य दयैकसिन्धोः रामानुजस्यचरणौ शरणं प्रपद्ये॥

प्रणामं लक्ष्मणमुनिः प्रतिगृह्णातु मामकम्।

प्रसाधयति यत्सूभि ः स्वाधीनपतिकां श्रुतिम्॥

Swamy Thirukkurugaippiraan Pillan



विख्यातो यतिसार्वभौमजलधेश्चन्द्रोपमत्वेन यः

श्रीभाष्येण यदन्वयाः सुविदिताः श्रीविष्णुचित्तादयः ।

व्याख्यां भाष्यकृदाज्ञयोपनिषदां यो द्रामिडीनां व्यधात्

पूर्णं तं कुरुकेश्वरं गुरुवरं कारुण्यपूर्णं भजे ॥

Swamy Sriman Nigamantha Maha Deshika
(Asthana Prathama Acharya)



Vibhavam
1268 – 1368

स्मृतिसन्देहभ्रान्तिमदसंगतिविकल्प मीलनोल्लासी। वेदान्तदेशिकमणिर्मोदान्विदधातु जगदलङ्कारः॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥


कवितार्किकसिंहाय कल्याणगुणशालिने । श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

रामानुज दयापात्रम् ज्ञानवैराग्य भूषणम्। श्रीमद्वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम्॥

अखिलभुवन-रक्षा-साधनायावतीर्णे कुमति-कलिविलासध्वान्त-तिग्मांशुजाले।

निरवधिकरुणाब्धौ वेदचूडागुरौ मे भवतु परमभक्तिः श्रीनिधौ वेङ्कटेशे॥

Swamy Sri Kumara Varadanatha Nayanaracharya Maha Deshika
(Bhagavadvishaya Kalakshepa Acharya)



Vibhavam
1315 – 1413

श्रावणे मासि रोहिण्यां जातं वेङ्कटदेशिकात्। विश्वामित्रान्वयाब्धीन्दुं वरदार्यमहं भजे॥

श्रीमल्लक्ष्मणयोगीन्द्र सिद्धान्तविजयध्वजं। विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे॥

Sri Brahmatantra Swatantra Parakala Maha Deshika
(Prathama Brahmatantra Swatantra Parakala Maha Deshika)




Asthana nirvaham
1286 – 1386

॥ पर्याय भाष्यकाराय प्रणतार्तिं विधून्वते । ब्रह्मतंत्रस्वतंत्राय द्वितीय ब्रह्मणे नमः ॥

॥ श्रीमत् श्री कविकथककण्ठीरव चरणनळिनयुगळ विन्यस्त समस्तात्मभर ॥

॥ हस्तीशं लोकविख्यातं कौण्डिन्य विदुषां वरम् । रामानुजार्यसिद्धान्त स्थापनाचार्यमाश्रये ॥


Sri Vatsya Vedanta Ramanuja Brahmatantra Swatantra Parakala Maha Deshika
(Dviteeya Brahmatantra Swatantra Parakala Maha Deshika)



Asthana nirvaham
1386 – 1394

ब्रह्मतंत्रकृपावाप्त ज्ञानयाथात्म्यसंपदम् । नमामि वात्स्यवेदान्तरामानुजमुनीश्वरम् ॥

Sri Srinivasa Brahmatantra Swatantra Parakala Maha Deshika
(Tritiya Brahmatantra Swatantra Parakala Maha Deshika)



Asthana nirvaham
1380 – 1405

श्रयामोवात्स्यवेदान्तरामानुजकृपास्पदम्। ब्रह्मतंत्रस्वतंत्रश्री श्रीनिवासगुरूत्तमम्॥


Sri Parakala Maha Deshika



Asthana nirvaham
1406 – 1424

ब्रह्मतंत्ररमावास गुरुवीक्षितमुत्तमम्। परकालगुरुं वन्दे चिरकालं दयानिधिम्॥

Sri Vedanta Ramanuja Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1424 – 1440

श्रयामहे श्रीपरकालमौनिपदाश्रयं तत्कृपायात्ततुर्यम् ।

वेदान्तविद्यानिलयं महान्तं वेदान्तरामानुजसंयमीन्द्रम् ॥

Sri Srinivasa Brahmatantra Swatantra Parakala Maha Deshika - I




Asthana nirvaham

1440 – 1460

वेदान्तलक्ष्मणमुनीश्वरपादपद्मयुग्माश्रयं सकलसद्गुणवारिराशिम् ।

तत्प्राप्ततुर्यमनघं कमलानिवास श्रीब्रह्मतंत्रगुरुवर्यमहं प्रपद्ये ॥

Sri Narayana Yogindra Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1460 – 1482

श्रीनिवासब्रह्मतंत्रकृपासारपरिप्लुतम् । श्रीनारायणयोगीन्द्रं ब्रह्मतंत्रगुरुं भजे ॥

Sri Rangaraja Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1482 – 1498

नारायणाख्य मुनिवर्य कृपाकटाक्ष वीक्षावशात्तचरमाश्रमतत्वसारम् ।

तद्दिव्यपाद सरसीरुह दत्तभारं श्रीरङ्गराजयतिराजमुपासिषीय ॥

Sri Brahmatantra Swatantra Parakala Maha Deshika - 4




Asthana nirvaham

1498 – 1517

श्रीब्रह्मतंत्रपादाब्ज संश्रयावाप्तसंपदम्। यतिराजं भजाम श्रीयतिराजाह्वयंगुरुम्॥

Sri Brahmatantra Swatantra Yatiraja Parakala Maha Deshika




Asthana nirvaham

1517 – 1535

रङ्गराजयतिवर्य वीक्षितं तत्कृपात्त निगमांचलद्वयम्। तत्पदार्पितभरं दयानिधिं ब्रह्मतंत्रयतिवर्यमाश्रये॥

Sri Varada Brahmatantra Swatantra Parakala Maha Deshika




Asthana nirvaham

1535 – 1552

यतिराजयतीन्द्रांघ्रि समाश्रय समेधितम्। वरदब्रह्मतंत्रार्यं वरदं संश्रयामहे ॥

Sri Brahmatantra Swatantra Parankusha Parakala Maha Deshika




Asthana nirvaham

1552 – 1567

भजामहे वरदयतीन्द्र सत्कृपा समेधितं सकलमहागुणांबुधिम्।

वदावदद्विरदचमूपराङ्कुशं पराङ्कुशं यतितिलकं निरङ्कुशम् ॥

Sri Kavitarkikasimha Brahmatantra Swatantra Parakala Maha Deshika




Asthana nirvaham

1567 – 1583

पराङ्कुशयतीशांघ्रि कृपात्तचरमाश्रमे । कवितार्किकसिंहेऽस्तु यतीन्द्रे मे नमश्शतम् ॥

Sri Vedanta Yatishekhara Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1583 – 1607

कवितार्किकसिंहाख्य यतिवर्यकृपावशात् । विवृद्धसंपदं वन्दे वेदान्तयतिशेखरम् ॥

Sri Jnaanaabdhi Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1607 – 1618

वेदान्तयतिवर्याप्त वेदान्तयुगळाशयं । ज्ञानाब्धिब्रह्मतंत्र श्रीपरकालगुरुं भजे ॥

Sri Veeraraghava Yogindra Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1619 – 1640

ज्ञानाम्बुधिब्रह्मतंत्र परकालमहागुरोः । अवाप्ततुर्यं वन्देऽहं वीरराघवयोगिनम् ॥

Sri Varada Vedanta Yogindra Brahmatantra Swatantra Parakala Maha Deshika - I




Asthana nirvaham

1640 – 1652

वीरराघवयोगीन्द्र विशेषकरुणेक्षितम् । नमामिमूर्ध्ना वरदवेदान्तमुनिपुङ्गवम् ॥

Sri Varaha Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1652 – 1663

श्रीमद्वरदवेदान्त संयमीन्द्र पदाश्रयम् । श्रीवराहब्रह्मतंत्रस्वतंत्र गुरुमाश्रये ॥

Sri Vedanta Lakshmana Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1663-1673

वराहब्रह्मतंत्रश्रीकृपास्पदमुपास्महे ।

वेदान्तलक्ष्मणाभिख्य ब्रह्मतंत्रमहागुरुम् ॥

Sri Varada Vedanta Yogindra Brahmatantra Swatantra Parakala Maha Deshika - II



Asthana nirvaham


1673 – 1676

श्रीमद्वराहमुनिवीक्षित लब्धबोधं श्रीतातयार्यकरुणापरिणाहपात्रम् ।

वेदान्तलक्ष्मणमुनीन्द्रपदाब्जभृंगं वन्दे सदा वरदवेदशिरोयतीन्द्रम् ॥

वेदान्तदेशिकश्रेष्ठसिद्धान्तोद्धारधूर्वहम् । वेदान्तसंयमीशानं श्रयेमकरुणानिधिम् ॥

Sri Maha Parakala Brahmatantra Swatantra Maha Deshika
(Sri Periya Parakala Swamy)



Asthana nirvaham
1676 – 1737

विन्यस्तात्मभरं वरप्रदगुरौ तद्देशिकैर्वीक्षितं श्रीवेदान्तयतीन्द्रभूरिकृपया संप्राप्तमोक्षाश्रमम् ।
सारार्थामृतलाभवन्तमनघाच्छ्री श्रीनिवासाद्गुरोः वन्दे श्रीपरकालयोगिनमहं वेदान्तविद्यागुरुम् ॥

Sri Srinivasa Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham
1737 – 1750

श्रीमच्छ्रीपरकालसंयमिवरादात्तापवर्गाश्रम श्रुत्यन्तद्वयसारसारथिवचो भाष्यार्थसम्यग्धियम् ।
श्रीमत्तातगुरौ समर्पितभरं तत्पादपद्माश्रयं श्रीवासं परकालयोगितिलकं दान्तं श्रयामोन्वहम् ॥
ज्ञानाम्बुराशिपरकालगुरोरवाप्त वेदान्तयुग्मचरमाश्रमसंप्रदायम् ।
श्रीतातदेशिकपदार्पितनैजभारं श्री श्रीनिवासपरकालगुरुं श्रयामः ॥

Sri Vedanta Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1750 – 1770

पद्मावासकलिद्विषन्मुनिवर श्रीपादसेवार्जित श्रुत्यन्तद्वय सारसारथिवचस्तात्पर्यतुर्याश्रमम् ।

श्रीमद्वेदवतंसयुग्मविशदीकारैकबद्धस्पृहं श्रीवेदान्तकलिद्विषं मुनिवरं सेवे शमांभोनिधिम् ॥

Sri Srinivasa Brahmatantra Swatantra Parakala Maha Deshika – 3
(Sri Abhinava Srinivasa Parakala Swamy)



Asthana nirvaham

1770 – 1771

पद्मानिवासपरकालयतीन्द्रलब्ध सारार्थवेदशिखरादिमसंप्रदायम् ।

तत्पाददत्तभरमुत्तमचित्तवृत्तिं श्रीश्रीनिवासपरकालगुरुं श्रयामः ॥

Sri Ramanuja Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1771 – 1810

वन्देय श्रीनिलयपरकालात्तवेदान्तयुग्मं तत्पादाब्जे विनिहितभरं ब्रह्मतन्त्रात्ततुर्यम्।

श्रीकृष्णार्यादधिगतरथांगाब्जमब्जाक्षहृत्कं श्रीमद्रामावरजपरकालाभिधं देशिकेन्द्रम्॥

Sri Ghantavatara Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1810 – 1837

रामानुजादिपरकालयतीन्द्रलब्ध वेदान्तयुग्मचरमाश्रमसंप्रदायम्।

श्रीशिङ्गरार्यगुरुवीक्षितमात्मवन्तं घंटावतारपरकालगुरुं श्रयामः॥

वेदान्तदेशिकेन्द्रस्य सिद्धान्तस्थापनोत्सुकः। जयतु श्रीशघंटांश परकालगुरूत्तमः॥

Sri Vedanta Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1828 – 1835

श्रीमद्रामानुजाद्यैः कलिरिपुगुरुभिर्वीक्षितं ब्रह्मतन्त्र

श्रीमद्धंटावतारोत्तमकलिमथनांघ्रयब्ज विन्यस्तभारम्।

तद्दीक्षालब्धवेदाञ्चलयुगळतुरीयाश्रमं शान्तिभूमिं

वेदान्तब्रह्मतन्त्राभिधकलिमथनाचार्यवर्यं प्रपद्ये ॥

Sri Srinivasa Brahmatantra Swatantra Parakala Maha Deshika - 4




Asthana nirvaham

1835 – 1860

श्रीमद्धंटावतारोत्तमकलिमथनावाप्तसत्संप्रदाय श्रीभाष्यश्रीरहस्यत्रयसृतिमदसीयांघ्रि विन्यस्तभारम्।

वेदान्तब्रह्मतन्त्राभिधकलिमथनाल्लब्धतुर्याश्रमं श्रीश्रीवासब्रह्मतन्त्रादिमपदपरकालाख्यमाचार्यमीडे ॥

Sri Srinivasa Deshikendra Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham
1860 – 1873

श्रीमद्घंटावतारोत्तमकलिमथनाल्लब्ध चक्राङ्कभाष्यम् वेदान्तब्रह्मतन्त्रोत्तमकलिमथनश्रीपदन्यस्तभारम्।

श्रीवासब्रह्मतन्त्रोत्तमकलिमथनोपात्ततत्त्वार्थतुर्यं वन्दे श्रीब्रह्मतन्त्रं कलिमथन रमावास सद्देशिकेन्द्रम्॥

Sri Ranganatha Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham
1873 – 1885

श्रीघंटांशात्तचक्राङ्कनमुदितहृदं प्राप्तवेदान्तयुग्मम्


वेदान्ताचार्यादधीताहितनिगमभरं श्रीनिवासांघ्रियुग्मात्।

श्रीमच्छ्रीवाससद्देशिकवरपुरुहूतात्ततुर्याश्रमं तम्

वन्दे श्रीरङ्गनाथं कलिमथनगुरुं ब्रह्मतन्त्राद्यशब्दम्॥

श्रीरामानुजसिद्धान्तस्थापको जयतादयम्। रङ्गनाथब्रह्मतन्त्र परकालयतीश्वरः॥

Sri Krishna Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1885 – 1915


श्रीवासब्रह्मतन्त्राभिधकलिमथनावाप्तचक्राङ्कभाष्यम्

श्रीवासे देशिकेन्द्रे कलिमथनगुरावर्पितात्मीयभारम् ।

रङ्गेन्द्रब्रह्मतन्त्रादिमपदकलिजिद्देशिकेन्द्रात्ततुर्यम्

श्रीकृष्णब्रह्मतन्त्राग्रिमपदपरकालार्यवर्यं श्रयामः ॥

Sri Vageesha Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1915 – 1925

शुभगुणनिधिं श्रीकृष्णब्रह्मतन्त्रकलिद्विषद्गुरुवरकृपादीव्यच्चक्राङ्कभाष्यभरार्पणम् ।

तदनघकृपाराजन्मोक्षाश्रमं कलयामहे वशिनमनघं वागीशब्रह्मतन्त्रकलिद्विषम् ॥

Sri Abhinava Ranganatha Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1925 – 1967

श्रीकृष्णब्रह्मतन्त्रोत्तमगुरुकरुणावाप्तचक्राङ्कभाष्यम्

वैराग्याचारवार्धौ वरदपदमुखे लक्ष्मणे न्यस्तभारम्।

श्रीवागीशात्ततुर्यं शठरिपुयतिराड्वेदचूडार्यमूर्तिं

नूत्नं श्रीरङ्गनाथं कलिरिपुमनघं ब्रह्मतन्त्रं श्रयामः ॥

श्री तुरगवदनपादू सन्ततपरिचरणमात्रपरमार्थः। जयतु श्रीमानभिनवरङ्गेन्द्रब्रह्मतन्त्रपरकालः ॥

Sri Abhinava Srinivasa Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham

1967 – 1972

श्रीकृष्णब्रह्मतन्त्राभिदकलिमथनाल्लब्ध चक्राङ्कभाष्यम्

नव्य श्रीरङ्गनाथे कलिमथनगुरावर्पितात्मीयभारम्।

तद्दीक्षालब्धतुर्यं हयवदनपदत्राणसेवाधुरीणम्

ध्यायेयं ब्रह्मतन्त्रं कलिमथनगुरुं श्रीनिवासं नवीनम्॥

श्रीमल्लक्ष्मी हयग्रीव पादुका सेवकोवशी। जीयान्नव्य श्रीनिवास परकाल गुरूत्तमः॥

Sri Abhinava Ramanuja Brahmatantra Swatantra Parakala Maha Deshika



Asthana nirvaham
1971 – 1992

नूत्नश्रीरङ्गनाथाङ्घ्रिमपदकलिजिल्लब्ध चक्राङ्कनश्रीः


त्र्यय्यन्त द्वन्द्वतत्त्वं तदनघचरणं न्यस्तभारं यतीन्द्रात्।

प्रत्यग्र श्रीनिवासात् समधिगत तुरीयाश्रमं संश्रयामः

नव्यं रामानुजाख्यं कलिमथनगुरुं ब्रह्मतन्त्रस्वतन्त्रम्।

श्रीलक्ष्मीहयास्यपादूवरिवस्यैकान्तमानसस्सततम्। जयतु श्रीमदभिनवरामानुजसंयमीन्द्रपरकालः॥


Sri Rangapriya Maha Deshika



श्रीवास सम्यमि वरेण्य निविष्ट भारम् श्रीरङ्गयोगिवर दिव्यकृपात्त योगम्।

श्रीलक्ष्मणाख्ययतिलब्ध कृपात्त चिह्नम् रङ्गप्रियं मम गुरुं शरणं प्रपद्ये॥

Srimath Abhinava Vageesha Brahmatantra Swatantra Parakala Maha Deshika



**Prakrtam Asthanam**

श्रीमत्कविकथककण्ठीरवचरणनलिनयुगलविन्यस्तसमस्तात्मभराः श्रीमद्वेदमार्गप्रतिष्ठापनाचार्याः परमहंसपरिव्राजकाचार्याः

सर्वतन्त्रस्वतन्त्रोभयवेदान्ताचार्याः श्रीमद्ब्रह्मतन्त्रस्वतन्त्र परकालसंयमीन्द्रमहास्थानमूर्धाभिषिक्ताः

श्री श्रीमदभिनव वागीश ब्रह्मतन्त्रस्वतन्त्र परकाल संयमि सार्वभौमाः

श्रीमन्नूतन रङ्गनाथयतिराडाप्तात्मविद्यालयम् श्रीमन्नूतन लक्ष्मणार्ययतिरात् संप्राप्त मोक्षाश्रमम्।

श्रीवासेन्द्र कटाक्ष सन्ततसुधा लक्ष्यात्म योगाञ्चितम् श्रीमन्नूतनवागधीशमनघं भक्त्याश्रयामो गुरुम्॥

नव्यवागीशयोगीन्द्रं हयास्यपदसेविनम्। ब्रह्मतन्त्रस्वतन्त्रार्यम् भजाम स्वात्मसंपदम्॥